**कोशनिर्माणे अनुसृतः क्रमः**

*** कोशस्य प्रथमे भागे पातञ्जलसूत्रार्थनिरूपणं वर्तते, तत्रापि-**
**१. प्रथमं सूत्रस्य पदपदार्थनिरूपणं वर्तते ।**
**२. सुखेन बोद्धुं योग्यैः वाक्यैः व्यासभाष्यानुसारेण सूत्रार्थस्य साररूपेण विवरणं वर्तते ।**
**३. विद्वद्भिः उपादेयानां व्यासभाष्यस्य टीकारूपाणाम् अतिगभीराणां शास्त्रीयाणां तत्ववैशारदी-योगवार्तिक-भास्वती-विवरणमिति चतुर्णां व्याख्यानानाम् अवलोकनं विधाय यथावश्यकं विशेषांशानां निरूपणं कृतं वर्तते ।**

*** कोशस्य द्वितीये भागे पातञ्जलयोगसूत्र-व्यासभाष्य-तत्ववैशारदी-योगवार्तिक-भास्वती-विवरणाख्येषु योगस्य मूलभाष्यटिकादिषु विद्यमानानां पदानाम् अर्थविवरणं वर्तते । तत्रापि-**
**१. प्रथमं विव्रीयमाणं पदं प्रदत्तम् ।**
**२. ततः मूलभाष्यटीकादिग्रन्थेषु तस्य पदस्य उपलब्धिः कुत्र कुत्र वर्तते इति ते प्रसङ्गाः सामस्त्येन प्रदत्ताः ।**
**३. ततः परं व्याख्यागम्याः तत्पदसम्बद्धाः नैके अर्थाः सुखेन बोद्धुं योग्यैः वाक्यैः निरूपिताः ।**
**४ .कोशे प्रथमान्तानि पदानि दत्तानि तथापि योगग्रन्थे तस्य इतरविभक्तिप्रयोगा अपि तैनैव ग्राह्याः भवन्ति ।उदा-ईश्वरप्रणिधानम् इति प्रथमविभक्त्यन्तं पदं कोशे प्रदत्तं,तेनैव 'ईश्वरप्रणिधानात्' इति पञ्चम्यन्तः प्रयोगः 'ईश्वरप्रणिधानानि' इति प्रथमाबहुवचनान्तप्रयोगः इत्येवं सर्वेऽपि ग्रान्थिकाः प्रयोगाः सङ्गृहीताः ।**

एषा च कोशरचनापद्धतिः डा।। रामचन्द्रभट्ट कोटेमने महोदयानाम् आध्यक्षे दिनाङ्के ४-३-२०१९ समायोजितायां सभायां तेषां निर्देशानुसारेण डा। ए.वि,नागसम्पिगे,डा। नारायण, डा। जयरामन् इत्येतैः विद्वद्वरेण्यैः सूचिता असीत् । तामेव प्रणालीमनुसृत्या मया अयं योगकोशः मिर्मितः ।

**सूत्रम् अथ योगानुशासनम्  १/१**

**सूत्रार्थः** - **योगानुशासनं**-योगशास्त्रं, **अथ**- अधिकृतं-आरब्धं वेदितव्यम् ।

**तात्पर्यार्थः** : -अथ शब्दः अधिकारार्थः इति व्यासभाष्यम् । अधिकारशब्दस्य आरम्भः इत्यर्थः । योगशब्दस्य समाधिरित्यर्थः(चित्तसमाधानम्) । चित्तस्य क्षिप्त-मूढ-विक्षिप्त-एकाग्र-निरुद्धभेदेन पञ्चविधाः अवस्थाः विद्यन्ते । समाधिस्तु(चित्तसमाधानन्तु) चित्तस्य पञ्चविधावस्थासु विद्यमानः साधारणधर्मः । पञ्चविधावस्थामध्ये विक्षिप्तावस्थायां कदाचित चित्त-स्थिरतायाः (चित्तसमाधानस्य) सद्भावेपि चञ्चलताबाहुल्यस्यैव सद्भावात् अत्र विद्यमानस्य चित्तसमाधानस्य अथवा चित्तस्थिरतायाः योगसंज्ञा नास्ति । एकाग्रावस्थायां या समाधिरूपाचित्तस्थिरता वर्तते तस्याः योगसंज्ञा अस्ति । प्रबललोभादिवशात् कादाचित्कायाः चित्तस्थिरतायाः कैवल्योपयोगित्वं नास्ति । एकाग्रावस्था तु

चित्तस्थिरतारूपस्य समाधेः आधाभूतावस्था वर्तते । अत्र एकाग्रावस्थापन्नचित्तं परमार्थिकं तत्वं द्योतयति । अत एव अविद्यादि समस्तक्लेशान् क्षीणान् करोति। कर्मसंस्काराणाम् प्रभावं न्यूनं करोति । एषा असम्प्राज्ञातसमाधेः पूर्वावस्थारूपा भूत्वा तस्याः कारणं भवति । एतादृशी एषाऽवस्था सम्प्रज्ञातयोगः इति उच्यते । अयं सम्प्रज्ञातयोगः चतुष्प्रकारकः वितर्कानुगतः , विचारानुगतः , आनन्दानुगतः , अस्मितानुगतः अस्ति । विषयोऽयं अग्रे स्पष्टीभविष्यति । यदा सर्वासां वृत्तीनां निरोधः भवति , तदा असम्प्रज्ञातसमाध्यवस्था प्राप्तुं शक्यते ।

**विशेषांशाः -(त.वै)अथ-** अथ शब्दस्य अधिकार एव अर्थः। न तु अथातो ब्रह्मजिज्ञासा इति सूत्रघटकअथशब्दवत् आनन्तर्यार्थकः । अपि पुनः यथा 'अथैष ज्योतिः इति ताण्ड्यब्राह्मणवक्यघटक-अथशब्दः क्रतुविशेषारंभार्थं प्रकटयति, तथैव अत्रापि अथ शब्दः योगशास्त्रारम्भार्थं प्रकटयति ।
योगशब्दः संयोगार्थकेन युजिर्-योगे इति धातुना न निष्पन्नः, किन्तु समाद्यर्थकेन युज-समाधौ इति धातुना निष्पन्नः।

**(यो.वा) अनुशासनम्-** शिष्टस्य शासनम् अनुशासनमिति इत्यर्थे अनुशासनशब्दप्रयोगात् पतञ्जलिः योगशास्त्रमिदं गुरुमूलमिति ज्ञापयन् अस्य शास्त्रस्य प्रामाण्यतां प्रतिपादयति । पुराणादिषु तावत् अस्य शास्त्रस्य आदिमः कर्ता पतञ्जलिः इति न निरूपितः। कर्ता पुनः हिरण्यगर्भः इति स्मृतिषु प्रसिद्धः। यथोक्तं याज्ञवल्क्यस्मृतौ

हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः ।

*** त.वै** अथ च व्यासभाष्ये केवलं विक्षिप्तावस्थायाः एव योगत्वस्या निराकरणं कृतम् ,क्षिप्तावस्थायाः मूढावस्थायाः तु योगत्वं न निराकृतमिति सन्देहो भवति । तस्य उत्तरन्तु इत्थं निरूपितं तत्ववैराद्याम् । सत्वगुणलेशयुक्तविक्षिप्तायाः एव योगोपयोगितानिराकरणात् रजोगुणप्रधानक्षिप्तावस्थायाः तथा तमोगुणप्रधानमूढावस्थायाः योगपयोगिता-निराकरणं स्वतःसिद्धमेव भवति । अतः व्यासभाष्यस्य न न्यूनता दोषः ।

## सूत्रम् -योगश्चित्तवृत्तिनिरोधः १/२

**सूत्रार्थः : चित्तवृत्तिनिरोधः - चित्तस्य याः वृत्तयः, तासां लयः योगः-समाधिः (इत्युच्यते)**

**तात्पर्यार्थः -** पूर्वोक्तस्य सम्प्रज्ञातासम्प्रज्ञातरूप-द्विविधयोगस्य लक्षणं निरूपयितुं सूत्रमिदं प्रवृत्तं वर्तते। यस्मिन् अवस्थाविशेषे प्रमाणादिवृत्तयः व्यापारशून्याः भवन्ति सः अवस्थाविशेषः 'योगः' इत्युच्यते । लक्षणे सर्वशब्दस्य-अग्रहणात् केवलं असम्प्रज्ञातावस्था एव योगः इति ज्ञायते । चित्तन्तु प्रकाशशीलं , प्रवृत्तिशीलं , स्थितिशीलं वर्तते । अत एव त्रिगुणात्मकं भवति। प्रकाशशीलं सत्वरूपं